फर्व्वर त्रि॰ फर्व–पूरणे अरन्। पूरके उ॰ १।१०६।२भा॰।

फल भेदने भ्वा॰पर॰सक सेट्। फलति अफालीत् पफाल फेलतुः आदित् क्वारम्भे भावे क्त वा इट्। फुल्तः फलितः। फुल्तम् फलितम् अन्यत्र फलितः इत्येव। जीत् वर्त्तमाने क्त। फलितः।

फल निष्पत्तौ भ्वा॰पर॰अक॰सेट्। फलति अफालीत्। पफाल फेलतुः। क्त फलितः।

फल गतौ भ्वा॰पर॰सक॰ सेट्। फलति अफालीत्। भावे॰ कर्त्तरि वा घञ्। फलः फालः। फलयति फालयति।

फल न॰फल–अच्।१वृक्षादीनां शस्ये २लाभे ३फलके (ढाल) ४कार्य्ये ५उद्देश्ये ६प्रयोजने अमरः ७जातीफले ८त्रिफलायां ९कक्कोले मेदि॰१०बाणाग्रे ११आर्त्तवे शब्दर॰१२फाले हेम॰ १३दाने धर॰।१४दृक्षे च।१५कुटजवृक्षे पु॰शब्दर॰। १६धात्वर्थनिष्पाद्ये प्रधानोद्देश्ये प्रयोजने “स्वरितञित आत्मनेपदं कर्त्तृ भिप्राये क्रियाफले” पा॰। “यस्यार्थस्य प्रसिद्ध्यर्थमारभ्यन्ते पचादयः। तत् प्रधानं फलं तेषां न लाभादि प्रयोजनम्” हरिः। तेन पाकादिजन्यं भोजनं यागादिजन्यञ्च पुण्यमेव फलम्। न वेतनादिलाभरूपं फलं तेन सूदस्य ऋत्विगादेर्वा न धात्वर्थजन्यफलभागित्वम्। धात्वर्थजन्ये १७संयोगादौ च “फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः। फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम्” हरिः। धात्वर्थशब्दे दृश्यम्। गौतमोक्ते १८प्रमेयभेदे तल्लक्षणञ्च तत्रोक्तं यथा

“आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्” गौ॰सू॰उद्दिश्य “प्रवृत्तिदोषजनितोऽर्थः फलम्” गौ॰ सू॰। “सुखदुःखसंवेदनं फलम् सुखविपाकं कर्म दुःखविपाकञ्च तत् पुनर्देहेन्द्रियविषयबुद्धिषु सतीषु भवतीति सह देहादिभिः फलमभिप्रेतम् तथा हि प्रवृत्तिदोषजनितोऽर्थः फलमेतत् सर्वं भवति तदेतत् फलमुपात्तमुपात्तं हेयं, त्यक्तं त्यक्तमुपादेयमिति नास्य हानोपादानयोर्निष्ठा,पर्य्यवसानं वाऽस्ति स खल्वयं फलस्य हानोपादानस्रोतसोह्यते लोक इति” वात्स्या॰। “अनिष्टमिष्टं मिश्रञ्च त्रिविधं कर्मणः फलम्। भवत्यत्यागिनां प्रेत्य न तु सन्न्यासिनां क्वचित्” गीता। लवणादिसंयोगे फलस्याक्षमत्वं यथा “तक्रं लोऽग्निसंयोगाल्लवणेन च पिष्टकम्। फलं त्रितयसंयोगादन्नं भवति तत्क्षणात्” रामार्चनचन्द्रिकाधृतवचनम् १९निष्पन्ने त्रि॰।

फलक न॰ स्वार्थे क। (ढाल) इति ख्याते चर्ममये अस्त्रप्रतिघातनिवारके १पदार्थे। २अस्थिखण्डे जटाध॰३नागकेशरे ४काष्ठादिपट्टके च मिता॰।

फलकक्ष पु॰ यक्षभेदे भा॰स॰ १०अ॰।

फलकण्टक पु॰फले कण्टकं यस्य। कण्टकिफले वृक्षे वैद्यक्॰ प्र॰

फलकपाणि पु॰फलकं पाणौ यस्य। (ढालि) चर्मिणि अमरः

फलपुर न॰ पुरभेदे तस्य नान्नोदात्तता।

फलकयन्त्र न॰ ज्यो॰सि॰ उक्ते यन्त्रभेदे यथा

“कर्त्तव्यं चतुरस्रकं सुफलकं स्वाङ्गाङ्ग९०कुलैर्विस्तृतं विस्तारादद्विगुणा१८०यतं सुगणकेनायाममध्ये तथा। आधारः स्वयमङ्गुलादिघटितः कार्य्यो च रेखा ततस्त्वाधारादवलम्बसूत्रवशतो सा लम्बरेखोच्यते। लम्बं नवत्या९०ङ्गुलकैर्विभज्य प्रत्यङ्गुलं तिर्य्यगतः प्रसार्य्य। सूत्राणि तत्रायतसूत्ररेखा जीवाभिधानाः सुधिया विधेयाः। आधारतोऽधः खगुणा३०ङ्गुलेषु ज्यालम्बयोगे सुषिरं च सूक्ष्मम्। दृष्टप्रमाणा सुषिरे शलाका ज्ञेयाऽक्षसंज्ञा खलु सा प्रकल्प्या। षष्ट्यङ्गुलव्यासमतश्च रम्यात् कृत्वा सुवृत्तं परिधौ तदङ्कम्। षष्ट्या घटीनां भगणांश ३६०कैश्च प्रत्यंशकं चाम्पुपलैश्च दिग्भिः। अस्त्रे परस्या तनुपट्टिकैका षष्ट्यङ्गुला दीर्घतया तथाङ्क्या” मू॰। “प्रथमादौ धातुमयं श्रीपर्ण्यादिदारुमयं वा फलकं चतुरस्रं श्लक्ष्णं समं कर्त्तव्यम्। तच्च नवत्यङ्गुलविस्तारं द्विगुण१८०विस्तारदैर्घ्यं च। तत्समीपे दैर्घ्यमध्ये तस्याधारः निर्मितः पट्टङ्गुलादिः कार्य्यः। आधारे धृते यन्त्रं यथा लम्बमानं स्यात् तथा धृते फलके आधाराद्धःसूत्रमवलम्बरेखा कार्य्या। सा च लम्बसंज्ञा। तं लम्बं नवतिभागं कृत्वा भागे भागे तिर्य्यग्रेखा दीर्घा कार्य्या। तिर्य्यक्त्वं तु लम्बभवान्तरस्यात्। सा रेखा ज्यासंज्ञा ज्ञेया। आधारादधस्त्रिंशदङ्गुलान्तरे या ज्या तस्याः लम्बस्य च सम्पाते सुषिरम्। तत्रेष्टप्रमाणा शलाका ज्ञेया साऽक्षसंज्ञा। तस्मादक्षात् त्रिंशदङ्गुलेन कर्कटकेन वृत्तरेखा कार्य्या। सा षष्टि६० घटिकाभिर्भगणांशकैः खषड्वह्निसंख्यैः३६० प्रत्यंशं दशभिर्दशभिः पानीयफलैश्चाङ्क्या। अथ ताम्रादिमयी वंशजा काष्ठमयी वा पट्टिका षष्ट्यङ्गुला६० दीर्घतया तैरेव फलकाङ्गुलैस्तथैवाङ्किता कार्य्या। सा पट्टिकार्धाङ्गुलविस्तृता। एकस्मिन्नग्रेऽङ्गुलविस्तृता कुठाराकारा कार्य्या। तत्र विस्तारमध्ये छिद्रं कार्यम्। अन्यस्मिंस्ततायाः पट्टिकाया लम्बो-